नं. ४८०६

नाम - गुरुकवच स्तोत्रम्

कर्त्ता x

पत्र - ४ पत्राणि सं. x

विषयः - तन्त्रम्

गुरुकवचम्

४८०६

४८०६ / ५ पूर्णं

श्रीगणेशायनमः श्रीदेव्युवाच देवेशपरमेशानभक्तानुग्रहकारक कुलध
र्मरतावीरास्तेषांसिद्धिःप्रकारणं १ ब्रूहिमेकृपयाशंभोतवप्रीत्यामयोपरि
साधकानांहितार्थायभुक्तिमुक्तिप्रदायकं २ ईश्वरउवाच शृणुदेवि
प्रवक्ष्यामिगुह्याद्गुह्यतरंमहत् लोकोपकारकंप्रश्नंतवप्रीत्यावदामि
ते ३ अद्यप्रभृतिकस्यापिनाख्यातंकवचंमया देशिकावहवःसंतिमं
त्राराधनतत्पराः ४ नतेषांजायतेसिद्धिर्मंत्रैर्वाचक्रपूजनैः गुरोर्वि
धानंकवचंमज्ञात्वाक्रियतेजपं ५ वृथाश्रमोभवेत्तस्यनसिद्धिर्मंत्रपूजनैः

सि १ १

गुरोः पादौ नमस्कृत्य प्राप्यते कवचं शुभं ६ तस्मान्मंत्रस्य यंत्रस्य सिद्धि
र्भवति नान्यथा गृह्णोयं चैव वक्तव्यं न वक्तव्यं वरानने ७ ॐ अ
स्य श्रीगुरुकवच महामंत्रस्य परमशिव ऋषिः सर्वदेवता छंदः
ॐ श्री शिवादि गुरवो देवताः ह्सौः बीजं ह्सः शक्तिः हसरक्ष मल
वरयूं कीलकं मम सकलसंकल्पसिद्ध्यर्थे श्रीसद्गुरुकवच महामंत्रज
पे विनियोगः अथ न्यासः ॐ ह्रां अंगुष्ठाभ्यां नमः ॐ ह्रीं तर्जना
भ्यां नमः ॐ ह्रूं मध्यमाभ्यां नमः ॐ ह्रैं अनामिकाभ्यां नमः ॐ ह्रौं

कनिष्ठिकाभ्यां नमः ॐ ह्रः करतलकरपृष्ठाभ्यां नमः इतिकर
न्यासः ॐ ह्रां हृदयाय नमः ॐ ह्रीं शिरसे स्वाहा ॐ ह्रूं शिखा
यै वषट् ॐ ह्रैं कवचाय हुं ॐ ह्रौं नेत्रत्रयाय वौषट् ॐ ह्रः अस्त्रा
य फट् इति षडंगन्यासः अथ ध्यानं स्वगुरुमेवं इष्टदेवतानामपू
र्वकं च ध्यायेत् श्रीरिद्धौघसिद्धौघमानवौघगुरुमूर्त्तिं संसारदुः
खशमनं द्विभुजं द्विनेत्रं वामांकशक्तिसकलाभरणैर्विभूषं ध्यो जपे
त्सकलसिद्धिवरप्रदं च एवं ध्यात्वा जपेत् ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः ॐ ऐं ह्रीं

श्रीं लं पृथिव्यात्मने परमात्मने गंध तन्मात्र प्रकृत्यानंदात्मने श्री गुरवे पृ
थिव्यात्मकं गंधं समर्पयामि नमः ॐ ऐं ह्रीं श्रीं हं आकाशात्मने परमात्म
ने शब्द तन्मात्र प्रकृत्यानंदात्मने श्री गुरवे आकाशात्मकं पुष्पं समर्प
यं ४ यामि नमः २ ॐ ऐं ह्रीं श्रीं यं वायात्मने परमात्मने स्पर्श तन्मात्र प्रकृत्या
नंदात्मने श्री गुरवे वाय्वात्मकं धूपं समर्पयामि नमः ३ ॐ ऐं ह्रीं श्रीं
रं तेजसात्मने परमात्माने रूप तन्मात्र प्रकृत्यानंदात्मने श्री गुरवे
तेजसात्मकं दीपं समर्पयामि नमः ४ ॐ ऐं ह्रीं श्रीं वं आपात्मने परमा
त्मने रस तन्मात्र प्रकृत्यानंदात्मने श्री गुरवे आपात्मकं नैवेद्यं समर्पया
मि नमः ५ ॐ ऐं ह्रीं श्रीं सं सर्वात्मने परमात्मने श्री गुरवे तांबूलं समर्प

त्मकं समर्पयामि नमः ६ ॐ श्रीनाथादि गुरुत्रयं गणपतिं पीठत्रयं भै
रवं सिद्धौघो वटुकत्रयं पद युगं दूतिक्रमं शांभवं वीरेशाष्ट चतुष्कषष्ठि
नवकं वीरावली पंचकं श्रीमन्मालिनि मंत्रराजसहितं वंदे गुरोर्मंडलं
ॐ प्रकाशानंदनाथश्च शिखायां पातु मे सदा परशिवानंदनाथः शिरो
मे रक्षयेत्सदा १ परशक्त्यानंदनाथो भाले रक्षतु सर्वदा । कौलेश्वरा
नंदनाथो नेत्रे मे पातु सर्वदा २ शुक्लेश्वरानंदनाथः श्रोत्रे रक्षतु मे सदा
कुलेश्वरानंदनाथो नासिकायां च रक्षतु ३ कामेश्वरानंदनाथो मुखं पा
तु सर्वतः दिव्यौघसप्तकं देवी पातु सर्वशिरस्तथा ४ कुलादिनाथ निप
यितं सिद्धौघो गुरवः प्रिये श्रीभोगानंदनाथश्च रक्षेन्मे रसनावाहुकं ५

क्रि क्रियानन्दनाथश्रीरक्षयेद्वामबाहुकं समयानन्दनाथश्रीस्त्वसौ नेहर
येवत्कं ६ सहजानन्दनाथश्रीकटिं नाभिं च रक्षतु हृष्टस्थाने बुधिर्ड्डौधार
से ३ श्रेतु सर्वंधिषु ७ श्र्याधारे पातु मानौघा गुरवः कुलनायके गगनानन्दना
थश्रीरक्षेन्मेलिंगमण्डलं ८ विश्वेशानन्दनाथश्री मम गुह्यं च रक्षतु विम
लानन्दनाथश्रीर्ह्यावूरू रक्षयेत्सदा ९ मदनानन्दनाथश्रीजंघयोः पातु मे
सदा भुवनानन्दनाथश्रीगुल्फयोः पातु मे सदा १० लीलानन्दनाथगुरु
रक्षयेत्पादपृष्टतः स्वात्मानन्दनाथगुरुः पादांगुलीश्च रक्षयेत ११ कल्लोल्ला
नन्दनाथश्रीरक्षेत्पादतले सदा इत्येवं गुरुकवचं तरोनाम्यादि पादयोः १२
गुरुरक्षेत्पृथिव्यां च सलिले परमो गुरुः परात्परतरः स्वात्मा पातु मां परमेश्वरः १३

श्रीगुरुक० ४

परमेष्ठिगुरुश्चैव रक्षयेद्वायुमण्डले शिवादिगुरवः साक्षाद्आकाशे रक्षयेत्स
दा १४ इन्द्रो गुरुः पातु पूर्वे आग्नेय्यां गुरवोऽव्ययः याम्ये यमो गुरुः पातु नै
ऋत्यां निर्ऋतिर्गुरुः १५ वरुणो गुरुः पश्चिमायां वायव्यां मारुतो गुरुः
उत्तरे गुरुधनदो ईशान्यामीश्वरो गुरुः १६ ऊर्ध्वे पातु गुरुर्ब्रह्मा अनंतो
गुरुरव्ययः स्वमित्रारयोरैक्यं कुर्वन्तु गुरवः सदा १७ सर्वत्र गुरुरूपं च दृ
श्यते साधकोत्तमः स्वात्मानं गुरुरूपं च ध्यायेन्मंत्रविशेबुधः १८ इत्येवं
गुरुकवचं ब्रह्मन् लोकेऽपि दुर्लभं तव प्रीत्या मयाख्यातं न वाच्यं यत्र कुत्रचित्
१९ पूजाकाले पठेद्यस्तु जपकाले विशेषतः त्रैलोक्यदुर्लभं देवि भुक्ति
मुक्तिफलप्रदं २० सर्वमंत्रफलं तेन स्यात्सर्वयंत्रफलं लभेत् सर्वतीर्थफ

४

लेद्देवि पठयेत्कवचं गुरोः २१ अष्टगंधेन भूर्जे च लिखितं मंत्रसंयुतं
कवचं गुरुदेवस्य नत्वा च शुभवासरे २२ पूजयेद्बहुपद्मपाद्यैः सुधूप
ध्यानसंयुतैः तर्पयेद्गुरुमंत्रेण साधकः शुद्धचेतसा २३ धारये
त्कवचं देवि विग्रहस्तत्त्वयं न हि पठ्यते यस्मिन्काले न समस्तो न च बंधना
त २४ इत्येवं गुरुकवचं परात्परतरं दिव्यौघसिद्धौघवान् मानौ
घाढ्यं मनशास्त्रथापरगुरुशिष्याय गुरुसंजितं नत्वा देशिकमंत्ररूपप ५
ठितं चित्ते बुजे श्रीगुरुं ध्यात्वा श्री रघुनाथ कवि [illegible] मनपरं श्रेते च मुक्ति
प्रदं २५ इति श्रीविश्वसारोद्धारे ईश्वरपार्वतीसंवादे श्रीगुरुकवचं स माप्तं

श्रीगनेश